(1665) " व्री वरणे " (IX-क्र्यादिः-1504. सक. अनि. पर.) प्वादिः । '—वरणे - आवरणे ' इति 'व्रीतः-व्रीतवान् आवारकेऽर्थे ' इति च काशकृत्स्नः । '—गतौ च द्रुमे ' इति धा. का. व्या (3. 9.) । 'व्रीणाति वरणे तत्र व्रीडो व्रीयेत तु श्यनि ।' (श्लो. 19) इति देवः ।

व्रायकः-यिका, व्रायकः-यिका, विव्रीषकः-षिका, वेव्रीयकः-यिका ;
व्रेता-त्री, व्राययिता-त्री, विव्रीषिता-त्री, वेव्रीयिता-त्री ;
[1]व्रिणन्-न्ती, व्राययन्-न्ती, विव्रीषन्-न्ती ; —
व्रेष्यन्-न्ती-ती, व्राययिष्यन्-न्ती-ती, विव्रीषिष्यन्-न्ती-ती ; —
इत्यादिकानि रूपाणि सर्वाण्यपि क्रैयादिकप्लिनातिवत् (1081) ज्ञेयानि । [2]व्रेपयति ।

(1666) " व्रीङ् वृणोत्यर्थे " (IV-दिवादिः-1140. सक. अनि. आत्म.) '—वरणे-आवरणे सामीप्ये ' इति काशकृत्स्नः । 'व्रीणाति वरणे तत्र व्रीडो व्रीयेत तु श्यनि ।' (श्लो. 19) इति देवः । '—छादनं परिग्रहो वा तत् ' इति धा. का. व्याख्यायाम् (1-58) ।

व्रायकः-यिका, व्रायकः-यिका, विव्रीषकः-षिका, वेव्रीयकः-यिका ;
व्रेता-त्री, व्राययिता-त्री, विव्रीषिता-त्री, वेव्रीयिता-त्री ;
इत्यादीनि रूपाणि सर्वाण्यपि दैवादिकधीङ्धातुवत् (901) ज्ञेयानि । धातोरस्य आत्मनेपदित्वात् शानचि व्रीयमाणः, व्रेष्यमाणः इति ज्ञेयम् ।

(1667) " व्रीड चोदने लज्जायां च "

(IV-दिवादिः-1126. अक. सेट्. पर.)

धातुवृत्तौ तु '—चोदने ' इत्येव । तरङ्गिण्याम् '—चोदने ' इति पठित्वा

---

1. शतरि, 'क्र्यादिभ्यः श्ना ' (3-1-81) इति श्ना विकरणप्रत्ययः । तस्य 'श्नाभ्यस्तयोरातः ' (6-4-112) इत्याकारलोपे 'प्वादीनां ह्रस्वः ' (7-3-80) इति ह्रस्वे च रूपमेवम् । ये तु प्वादित्वमस्य नाभ्युपगच्छन्ति, तेषां मते व्रीणन् इति दीर्घघटितमेव रूपम् ।
2. " स्वामिकाश्यपादयः 'अर्तिह्रीव्री—'(7-3-36) इति पठन्तो व्रेपयतीति पुकं प्रतिपन्नाः " इति धातुवृत्तिः । क्षीरतरङ्गिण्यां तु अत्र नैतादृशः पाठः उपलभ्यते । इतः पूर्वं 'व्ली वरणे' इत्यत्र (धातौ) व्लेपयतीति पुगविशिष्टत्वेन उदाह्रियते ।